परीक्षा 2023–24

कक्षा – दशम्

समय – 03 घण्टे | विषय – संस्कृत | पूर्णांक – 75

आलोक : (01) सर्वे प्रश्नाः समाधेयाः।

(02) शुद्धं स्पष्टं च लिखत्।

(03) अस्मिन् प्रश्न पत्रे प्रश्नानां संख्या 18 (अष्टादशः) अस्ति।

प्रश्न (01) (अ) उचितं शब्दं चित्वा लिखत – (5)

(1) खलस्य विद्या भवति –

(क) ज्ञानाय (ख) विवादाय

(ग) रक्षणाय (घ) दानाय

(2) वपुः आख्याति–

(क) भोजनम् (ख) वंशम्

(ग) भाषितम् (घ) स्नेहम्

(3) राष्ट्रिय ताप विद्युत केन्द्रमस्ति–

(क) बिलासपुरे (ख) रायपुरे

(ग) कोरबा नगरे (घ) रायगढ़े

(4) 'बहिः' योगे विभक्ति अस्ति –

(क) प्रथमा (ख) द्वितीया

(ग) पंचमी (घ) सप्तमी

(5) 'कविना' इत्यस्मिन् शब्दे विभक्ति अस्ति–

(क) प्रथमा (ख) द्वितीया

(ग) तृतीया (घ) चतुर्थी

(ब) उचितं विकल्पं चित्वा रिक्त स्थानानि पूरयत – (5)

(वेपते, शोधका, कतृ, लोभात्, आधारभूतं)

(1) 'रामः पुस्तकं पठति' वाक्ये ............ वाच्यं अस्ति।

(2) ............. त्यजति मित्राणि।

(3) वायूनां ............... वृक्षाः।

(4) व्याकरणं तु भाषायाः ............. भवति।

(5) ............. मे शरीरम्।

(स) उचितं स्तम्भं सुमेलयत – (5)

| | (क) | | (ख) |
|---|---|---|---|
| (1) | दृष्ट्वा | – | लङ्गकारः |
| (2) | जगत् + नाथ | – | तृतीया विभक्ति |
| (3) | अरोचत् | – | क्त्वा प्रत्यय |
| (4) | प्रीत्या | – | भविष्यत् काल |



https://www.cgboardonline.com

(5) नर्तिष्यति – जगन्नाथः

प्रश्न (02) अधोलिखितानां संख्यानां संस्कृत भाषया लिखत – (2)

(1) एक सौ पैंतीस (135) (2) एक सौ छः (106)

प्रश्न (03) निम्नयोः शब्दयोः संधिं कृत्वा नामानि लिखत – (2)

(1) कः + चित् (2) जगत् + ईशः

प्रश्न (04) वाच्यम् अवबोधयत – (2)

(1) सः लेखं लिखति। (2) त्वया कविता श्रूयते।

प्रश्न (05) रेखांकित शब्दयोः प्रत्ययं पृथक् कुरूत– (2)

(1) रमेशः <u>गत्वा</u> फलानि आनयति।

(2) बालकः <u>स्नातुं</u> गच्छति।

प्रश्न (06) निर्देशानुसारेण त्रिषु वचनेषु धातु रूपाणि लिखत – (3)

(1) वृत् (वर्त) – लृट् लकार – मध्यम पुरूष

(2) पठ् – लोट् लकार – उत्तम पुरूष

(3) भू – लट् लकार – प्रथम पुरूष

प्रश्न (07) विग्रह वाक्यानां सामासिक शब्दं लिखित्वा नामानि लिखत्– (3)

(1) रामश्च लक्ष्मणश्च (2) ज्ञानेन हीनः

(3) पंचानां वटानां समाहारः

प्रश्न (08) अधोलिखित गद्यांशात् कानिचित् त्रीणि अव्यय पदानि चित्वा लिखत्– (3)

"यदा वर्षाकाले अरपा नद्यां जलप्लावनं जातम्। तदा बिलासा नौकया जनान् संतारयतिस्म। एवमेव सा नौकाचालनेऽपि पारंगता जाता।

प्रश्न (09) अधोलिखित श्लोकस्य हिन्दी अनुवादं कुरूत – (3)

सर्वा विद्या पुरा प्रोक्ताः संस्कृते हि महर्षिभिः।
तद्विद्यानिधये सेव्यं, संस्कृतं कामधेनुवत्।।

प्रश्न (10) अधोलिखित श्लोकस्य हिन्दी अनुवादं कुरूत – (3)

दिनान्ते च पिबेत् दुग्धम्, निशान्ते च पिबेत् पयः।
भोजनान्ते पिबेत् तक्रम्, किं वैद्यस्य प्रयोजनम् ।।

प्रश्न (11) अधोलिखित गद्यांशस्य हिन्दी भाषया अनुवादं लिखत– (3)

कश्चन् निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। सः स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दातुं सफलो जातः। तत्तनयः तत्रैव



https://www.cgboardonline.com

छात्रावासे निवसन् अध्ययने संलग्नः समभूतः। एकदा स पिता तनुजस्य रूग्णतामाकर्ण्य व्याकुलो जातः। पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्यन पीड़ितः स बसयानं विहाय पदातिरेव प्राचलत्।

प्रश्न (12) अधोलिखित गद्यांशस्य हिन्दी भाषया अनुवादं लिखत– (3)

"यदा वर्षाकाले अरपा नद्यां जलप्लावनं जातम्। तदा बिलासा नौकया जनान् संतारयतिस्म। एवमेव सा नौकाचालनेऽपि पारङ्गता जाता। सा लोकनृत्यगीतयोः अपि सिद्धा आसीत्। ग्रामस्य सर्वेषु कार्यकमेषु सा अग्रसरासीत्। https://www.cgboardonline.com

प्रश्न (13) अधोलिखित चतुर्णां प्रश्नानामुत्तराणि संस्कृत भाषया लिखत– (4)

(1) तड़ागे गत्वा शृगालः किमकरोत्?
(2) केन न प्रकाशते?
(3) कः चन्दनदासं द्रष्टुमिच्छति?
(4) आत्मानन्देन लिखित ग्रन्थस्य नाम किम्?
(5) वातः किं करोति तण्डुलस्य?
(6) हेमन्तकाले किं सुखावहं भवति?

प्रश्न (14) अधोलिखित चतुर्णां प्रश्नानामुत्तराणि हिन्दी भाषया लिखत– (4)

(1) कः परिवारः एव वरम्?
(2) मङ्गलयानं कुतः विमुक्तम्?
(3) संसारे कानि– कानि चकवत् परिवर्तन्ते?
(4) आत्मानन्दस्य जन्म कदा अभवत्?
(5) कतिधा मङ्गलयानस्य मार्गः परिवर्तितः?
(6) कस्य प्रसादेन चन्दनदासस्य वाणिज्या अखण्डिता?

प्रश्न (15) स्व पाठ्य–पुस्तकात् चतस्त्रः सूक्तीः लिखत यो प्रश्नपत्रेऽस्मिन् नागताः स्यु। (4)

प्रश्न (16) स्व पाठ्य–पुस्तकात् द्वौ श्लोकौ लिखत यो अस्मिन् प्रश्न– पत्रे न आगच्छत्। (5)

प्रश्न (17) (अ) स्व प्राचार्यं प्रति त्रयः दिवसाः अवकाशाय संस्कृत भाषया प्रार्थना– पत्रं लिखत।

अथवा (4)

शुल्क क्षमापनार्थं प्राचार्यं प्रति प्रार्थनापत्रं कोष्ठके प्रदत्त पदानां सहायतया लिखत्–

(मम, कर्मचारी, प्राचार्य, निर्वाहः, न्यूनं, अध्ययन शुल्कं, शिष्यः, सदस्याः)

सेवायाम्



https://www.cgboardonline.com

श्रीमान् .................... महोदयः
शासकीय उच्च. माध्य विद्यालय
जशपुर नगरम्, छत्तीसगढ़म्

विषय : शुल्क क्षमापनार्थं प्रार्थनापत्रम्।

महोदयः!

सविनयं निवेदनं अस्ति यत् ............. पिता एकः चतुर्थ श्रेणी ............. अस्ति। तस्य मासिक आयः अतीव ............. अस्ति। येन परिवारस्य .............. काठिन्येन भवति। मम परिवारे माता, पिता, द्वौ भ्रातरौ एका भगिनी च इति पञ्च . .............. सन्ति। अतः अहं भवन्तं ................ यत् मम ............. क्षमापयतु।

दिनांक : 15–01– 2024

भवदीयः
नामः अ,ब,स
कक्षा – दशम्
शासकीय उच्च. माध्य विद्यालय जशपुर
नगरम्, छत्तीसगढ़म्

(ब) अधोलिखित अपठित गद्यांश पठित्वा निर्देशानुसारेण संस्कृत भाषया उत्तरत– (4)

जनानां लोकानां वा तन्त्रं शासनं जनतन्त्रं वा कथ्यते। लोकतन्त्रे जनानां कल्याणम् एवं शासनस्य प्रमुखं कार्यं मन्यते। अत्र प्रत्येकस्य जनस्य एव महत्वम्। भाषणे लेखने च अत्र पूर्ण स्वातन्त्र्य भवति। व्यवहारे केचन् दोषाः अपि दृश्यन्ते। एतेषां दोषाणां दूरीकरणम् अनिवार्यम्। एतदर्थं सर्वेभ्यः शिक्षा अनिवार्या। शिक्षां विना लोकतन्त्रं सुरक्षितं न भवति।

पूर्णवाक्येन् उत्तरत् –

(1) लोकतन्त्रे कस्य महत्वं प्रमुखम्?
(2) कां विना लोकतन्त्रं सुरक्षितं न भवति?
(3) लोकतन्त्रे दोषान् दूरीकर्तुं किं अनिवार्यं अस्ति?
(4) किं नाम लोकतन्त्रम्?

अथवा

(1) गद्यांशस्य उपयुक्तं शीर्षकं लिखत्।
(2) गद्यांशस्य सारांशं लिखत्।

प्रश्न (18) द्वादश वाक्येषु संस्कृत भाषया निबंध लेखनं कुरूत (कोऽपि एकः) (6)

(1) मम प्रदेशः (छत्तीसगढ़ः)
(2) महाकवि कालिदासः
(3) ग्राम्य जीवनम्
(4) बीटा (क्रिकेट)

==00==

https://www.cgboardonline.com
Whatsapp @ 9300930012
Send your old paper & get 10/-
अपने पुराने पेपर्स भेजे और 10 रुपये पायें,
Paytm or Google Pay से



https://www.cgboardonline.com